# ॥ महालक्ष्म्याष्टकम् ॥

श्री गणेशाय नमः । इंद्र उवाच ।
नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शंख चक्र-गदाहस्ते महालक्ष्मी नमोऽस्तुते ॥१॥
नमस्ते गरुडारूढे कोलासूर भयंकरि ।
सर्वदुःखहरे देवि महालक्ष्मी नमोऽस्तुते ॥२॥
सर्वज्ञे सर्ववरदे सर्व दुष्ट भयंकरि ।
सर्वपापहरे देवि महालक्ष्मी नमोऽस्तुते ॥३॥
सिद्धि-बुद्धि-प्रदे देवि भुक्ति-मुक्ति-प्रदायिनी ।
मन्त्रमूर्ते सदा देवि महालक्ष्मी नमोऽस्तुते ॥४॥
आद्यन्तरहिते देवि आद्याशक्ति महेश्वरि ।
योगजे योगसम्भूते महालक्ष्मी नमोऽस्तुते ॥५॥
स्थूल-सूक्ष्म-महारौद्रे महाशक्ति महोदरे ।
महापापहरे देवि महालक्ष्मी नमोऽस्तुते ॥६॥
पद्मासनस्थिते देवि परब्रह्म-स्वरूपिणि ।
परमेशि जगन्मातार्महालक्ष्मी नमोऽस्तुते ॥७॥
श्वेताम्बर धरे देवि नानालंकारभूषिते ।
जगत्स्थिते जगन्मातार्महालक्ष्मी नमोऽस्तुते ॥८॥
महालक्ष्म्याष्टकस्तोत्रं यः पठेद् भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९॥
एककालं पठेन्नित्यं महापापविनाशनम् ।
द्विकालं यः पठेन्नित्यं धन-धान्य-समन्वितः ॥१०॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मी भवेन्नित्यं प्रसन्न वरदा शुभा ॥११॥

**॥ इतिन्द्रकृतः श्री महालक्ष्म्याष्टक स्तवः संपूर्णः ॥**